का वा सत्कीर्तिः लभ्येत भवता। दक्षोऽपि भवान् समक्षप्रवृत्तं कुलकान्तापरिभवं न निवारितवान्। तया धर्मोपेक्षया कियत् अपयशस्ते लब्धमिति न जानाति भवान्। एककोऽपि भवान् स्वान् असून् तत्पापप्रणोदनाय यदि अत्यक्ष्यत् तर्हि एतद्दुरन्तपरिणामो नाभविष्यत्। भवान् अयं द्रोणः सभास्थाश्च सर्वे तदानींतनपापफलस्य भोक्तारो भविष्यन्त्येव। बलीयसो भवत आश्रयेणैव ननु धृतराष्ट्र-दुर्योधनादयो नानुमन्यन्ते साधुं सन्धिपथम्। तेन हि सम्भविष्यतः आयोधनानर्थस्य भवन्त एव मूलकारणं इति जानन्तु भवन्तः। भवदभिलषितः एष सङ्ग्रामः अभि-मुखमेव आगच्छति। मोदध्वम्। भीष्म! असाधारणपराक्रम-गर्वितो भवानेव अम्बाकुमार्याः जीवितविनाशे हेतुरिति किमु विस्मृतं भवता। तस्याधर्मस्य परिणाम एव रणाङ्गणे पुरतः प्रत्यक्षरूपेण स्थित्वा भवतः पतनस्य विशिष्टसाधनं भविष्यति। पश्यसि ननु। असत्याधर्मपक्षैः दुरहंभावान्धी-भूतनेत्रैः धार्तराष्ट्रैः सह सङ्ग्रामाग्नौ भवन्तोऽपि शलभतां गच्छेयुः। वीराधिवीरा इति दिव्यांशसंजाता इति अजय्या इति च दुर्गर्वाध्मातस्वान्ताः भवन्तः भवत्साहाय्यकराश्च भगदत्तादयः सर्वेऽपि दुष्टकीटका एव कालदंष्ट्रया। लोक-हिंसकानां विषोग्राणां सर्पाणामिव युष्माकमपि हनने नास्ति दोषलेशोऽपि। अयं सङ्ग्राम एवाध्वरः। उपदेष्टा अहम्। युधिष्ठिरो दीक्षितः। कौरव्याः पशवः। धर्म-

संस्थापनमेव फलम्। पश्यामस्तावत् को वा विघ्नमापादयितुं शक्त इति।

[प्रविशति कुन्ती। श्रीकृष्णः प्रणम्य कुन्तीमासने उपवेश्य स्वयमप्युपविशति]

कुन्ती : माधव! विफलो नु ते सन्धिप्रयत्नः। इतः परमपि क्षात्रधर्मे प्रवर्तते धर्मजः, उत याचकवृत्तिमवलम्ब्य वंशप्रतिष्ठाया भङ्गमापादयति।

कृष्ण : जननि! अवश्यंभाविनौ सङ्ग्रामश्च कौरवाणां विनाशश्च। तथापि लोकदाहकस्यायोधनस्य निवारणाय प्रयत्नः कृतः उत्तमो धर्मः सम्पद्यते खलु। अनेन सन्धिप्रयत्नेन पाण्डवानां उदारा गुणगणाः, कौरवाणां लोभस्वभावादयश्च लोकस्य सुव्यक्ताः। इदमस्माकं नैतिकं बलम् विजयोदर्कश्च। भसितच्छन्नाग्निकल्पं धर्मजस्य निसर्गस्वरूपं शीघ्रमेव द्रक्ष्यन्ति कौरवाः सर्वे। सत्पुरुषकोपाग्निः अकृत्वा सर्वपापभस्मीकरणं नोपशाम्यति। अलं शङ्कया। भवत्पुत्रेभ्य उचितं संदिश्य प्रेषय माम्।

कुन्ती : माधव! कुलधर्मः निजवंशोचितवीरवृत्तिश्च सर्वदा परिपालनीयौ भवद्भिरित्यतः अन्यः कोवास्ति सन्देशः। ऋते पराक्रमजीवनवृत्तेः राज्ञां नास्तीतरा वृत्तिरिति त्वं जानासि। निस्तेजस्कतया याच्ञावृत्त्या लब्धा संपत् दैन्यावहा हेया चेति न जानीते किं धर्मजः। सभायां प्रवृत्तस्य सतीपरिभवस्य प्रतीकारः अवश्यकरणीयः भीमार्जुनाभ्याम्। यदि

तन्न घटेत तर्हि भीमार्जुनयोः बलपराक्रमादयः व्यर्था एव इति मद्वचनात् भण। कृष्ण! यदि जगन्मान्यो भवान् पापेन सह सन्धि करोति तर्हि का वा धर्मस्य गतिः। आबाल्यात् त्वया लक्ष्यीक्रियमाणं विशिष्टप्रयोजनं अद्य संस्मरणीयं भवता। गच्छ। पाण्डवान् द्वारीकृत्य दुष्टान् निगृह्य लोके प्रतिष्ठापय पुनः सत्यं च धर्मं च। विश्वस्य श्रेयो भूयात्।

[भीष्मद्रौणौ विवर्णवदनौ अन्योन्यमवलोकयतः]

कृष्णः वीरजननि! अमोघमिदमाशीर्वचनम्। महतीमिमां भवदीयामाज्ञां निर्वर्त्यैव पुनरात्मानं भवतीं दर्शयिष्ये। अस्य लक्ष्यस्य सिद्ध्यै च कियानपि त्यागः कर्तव्योऽस्माभिः। सोढव्यश्च महानपि क्लेशः। न केवलं मानिनीमानघातिनः कर्णदुर्योधनादयः, अपितु तदालम्बनाः भीष्मद्रोणादयः सर्वे मृतकल्पा एव इत्यवेहि। इन्द्रियलोलुपानां लोकोपद्रवकारिणां क्रौर्येण विजृम्भमाणानां असंख्याकानां नररूपाणां पशूनां विशसनेन विना अयं सङ्ग्रामयज्ञः सम्पूर्णतां न गच्छति। अस्य महाप्रयत्नस्य प्रतिबन्धकाः ये के वा भवेयुः, तान् सर्वान् कीटकानिव निष्पिष्य लोके पुनः प्रतिष्ठापयामि धर्मम्। मातः! आशिषः प्रयुज्य मां प्रेषय। (कुन्तीपादयोः प्रणमति)

[प्रविशति दारुकः कर्णदुर्योधनौ च]

दारुकः देव! सज्जीकृतो रथः। प्रयाणस्य सुमुहूर्त आसन्न इति विज्ञापयति देवः सात्यकिः।

कृष्णः दारुक! आगच्छामि। रथान्तरेण मामनुसर इति सात्यकिं ब्रूहि। (कर्णं दृष्ट्वा) कर्ण! किञ्चिद्दूरं अनुगन्तव्यं भवता। एहि। (कर्णं हस्ते गृहीत्वा भीष्मद्रोणाववलोक्य) पितामह! आचार्य! अलम्, अत्रैव स्थीयताम्। रणाङ्गणे पुनर्दर्शनं भूयात्। (निष्क्रान्तः)

[यवनिका]

द्वितीयोऽङ्कः

[दुर्योधनप्रासादैकदेशे कानिचिदासनानि सन्ति। दुश्शासन एकतः तिष्ठति। कञ्चुकिप्रतीहार्यौ निश्शब्दं स्वनियोगमनुतिष्ठतः। चिन्तानिमग्नो दुर्योधन इतस्ततः परिक्रम्य—किञ्चित्कालानन्तरम्]

दुर्यो: (दुश्शासनमवलोक्य) वत्स ! कुतो विलम्बते कर्णः ? को नियुक्तस्तमानेतुम् ?

दुश्शा: लक्ष्मणवृषसेनौ प्रेषितौ। मन्ये अधुनैवागच्छतीति। अग्रज ! शौर्यौदार्यसम्पन्नौ कर्णवृषसेनौ सूतकुलसंजाताविति विचित्रमिदम्।

दुर्यो: (स्मित्वा) अनुज ! कदापि अङ्गारखनौ वज्रं किं समुत्पद्येत ? किं सहजकवचकुण्डलालङ्कृतः खरकिरणतेजोविभासी शौर्यनिधिः कर्णः सूतकुलसम्भूतो भवितुमर्हति। असम्भाव्यमेतत्। कस्या अपि सुक्षत्रियकन्याया जातः आभिजात्यं रक्षितुकामया तया मन्ये नदीप्रवाहे विसृष्ट इति। न सर्वथा हीनकुलललनासञ्जातोऽसौ। भण, कुरुषु कोवा तादृश शीलसौजन्यशौर्यौदार्यभाजनमिति।

दुश्शा: तथ्यम्। अयमतिविचित्रो विषयः। अत एव खलु बहुषु विषयेषु विसंवदतोऽपि पितामहस्य कर्णे निरतिशय आदरः।

दुर्यो: न केवलं पितामहस्य। श्रुतं किल सन्ध्यर्थमागत्य निवर्तमानः स कृष्णोऽपि कर्णं स्वीये रथ उपवेश्य स्वच्छन्दसल्लापमकरोदिति। सुक्षत्रियाप्रसूतः कर्ण इत्यत्र न कोऽपि विशयः।

दुश्शा : अग्रज ! श्रुतं मया कृष्णसल्लापानन्तरं प्रत्यागतः कर्णः उद्विग्न इव, विमनस्क इव, पदे पदे शून्यहृदयस्तिष्ठतीति । किं वा भवेत् कारणम् ?

दुर्यो : वत्स ! कृष्णः खलु कर्णस्य मनसि किमप्यान्दोलनमुत्पाद्य उत्साहभङ्गमकरोत् । पूर्वेद्युः सभायां रथातिरथरथोदारादिपरिगणनावसरे पितामहेन कर्णस्यार्धरथत्वेन परिगणनायामनुपदमेव सः कियदुद्वेगभरितोऽभवत् इति भवता दृष्टं किल । अन्ते आभीष्मपातं अहं न योत्स्य इति सोऽस्त्रत्यागमकरोत् । प्रकृतिगम्भीरस्य कर्णस्य तादृशी अवस्था चेत्तत्र महता कारणेन भवितव्यम् ।

कञ्चु : (प्रविश्य) विजयतां महाराजः । आगतोऽङ्गराजः ।

दुर्यो : तथा नु । एष आगतोऽस्मि । (प्रत्युद्गम्य, कर्णमालिङ्ग्य हस्ते गृहीत्वा आनीय उपवेशयति । कर्णः परं दूनस्तिष्ठति ।)

दुर्यो : अङ्गराज ! किंहेतुकमेतत्परिवर्तनम् ? अकलङ्कचारित्रस्य तवापि नाम उद्वेगः ।

कर्ण : महाराज ! सुखिनि त्वयि कुतो म उद्वेगः । परं तु खिद्येऽहं नितरां भृत्यधर्मं न निर्व्यूढवानिति । ह्यः किल सभायां कुपित्वा भीष्माय, विधाय चास्त्रत्यागं अद्य जिहेमि कियदनुचितमकरवमिति । एतावन्तं कालमवाप्य सम्भावनां भवतः, प्राप्ते काले युष्मत्सेवायामसमर्थोऽभवमिति नितरां खिन्नोऽस्मि ।

दुर्यो : कर्ण ! कुत एषा चिन्ता । किमहमनभिज्ञस्ते हृदयस्य ! पश्यामस्तावत् पितामहस्याधिपत्ये कियत्पर्यवसन्नं भवतीति ।

प्रत्यजानात् किन्तु पितामहः पाण्डवसेनां पादमात्रावशेषां करोमीति। लब्धे चावसरे पाण्डवेष्वन्यतमः भवेदाहुतिः तस्य शौर्याग्नौ। अनुजेष्वन्यतमस्य पाते तावदेव युद्धाद्विरमामीति खलु धर्मजस्य शपथः। तथा च सति समीचीनमेव सर्वम्। कुतस्तवेदानीं युद्धाकरणचिन्ता। लोकप्रथिते हि तव दिग्विजयिनः शक्तिसाहसे।

कर्णः महाराज! अनभिज्ञस्त्वं भीष्मद्रोणयोरन्तरङ्गस्य। यथा त्वं तयोः प्रेमभाजनं, पाण्डवा अपि तथैव। हन्यातां तौ कियतोऽप्यनीकपुरुषान्। परं अभिमुखेषु पाण्डुकुमारेषु न प्रसरतस्तयोर्हस्तौ। यथा यथा पाण्डवाः तावभिघ्नन्ति तथा तथा तयोरानन्दाश्रूणामुपचयः। अभिज्ञोऽहं एतस्य विषयस्य। किमविदितमस्माभिः, उत्तरगोग्रहणावसरे पार्थस्य सम्मोहनास्त्रेण पितामहः किममूर्च्छत्, उत स्मयमानस्तूष्णीमभवत् इति। तस्मात् मनसि मा कुरु तावत् पाण्डवान् भीष्मद्रोणौ हनिष्यत इति।

दुश्शा: कर्ण! मा तावत्। किं नु वयमर्जुनमभिगन्तुमसमर्थाः?

कर्णः युवराज! मा कुप्य। यूयमनभिज्ञाः पार्थचातुर्यस्य। किरीटिनोऽस्त्रविद्यापि काचित् कला। अनुक्षणं बाणप्रयोगवैखरीं परिवर्तयन् भीकराणि विचित्राणि दृश्यानि प्रदर्शयन् सः प्रतियोद्धारं चेतनाहीनं करोति। कर्तव्यमूढेऽस्मिन् निश्चेष्टे स्मयमानः अर्जुनः लीलया तस्य शिरश्छिनत्ति। एतच्चातुर्यदर्शनमात्रेणैव भीष्मद्रोणौ प्रहृष्यतः। तस्मात् बीभत्सुः

रणाङ्गणे स्वैरं वीरविलसितं करोति। अविगणय्य तदस्त्र-कौशलं, विधाय च प्रतिप्रयोगं, निर्दयं तच्छासने पटीयः शौर्यं ममैकस्यैव। मद्विहीने रणाङ्गणे तस्य उच्छृङ्खलतां रोद्धुं अशक्यम्।

दुर्यो : मित्र! अस्तु नामैवम्। परं तु को वा लाभः अतिक्रान्तस्य परिदेवनेन। अनवरतं त्वामधिक्षिपन् अश्वत्थामा सांप्रतं प्रकटयन्नात्मपौरुषं रुणद्धु पार्थस्य वीरविलसितम्। नन्वहमेनं प्रोत्साहयामि। त्वमपि चिन्तामिमां विहाय यथापूर्वं प्रसन्नो भव। अधुना तवाह्वाननिमित्तमन्यत्। श्रुतं किल शल्यः धर्मजपक्षमाश्रयितुं ससैन्य आयातीति। वर्तेऽहमधुना वर्त्मनि तमतिसन्धाय, यथा वाऽसावस्मानुपगच्छेत् तव सारथ्यमनुतिष्ठेत्, तथा कर्तुम्। मध्येमार्गं तदुपगमनमावश्यकम्। तदास्माभिः साकं त्वयाप्यागन्तव्यम्।

कर्ण : महाराज! क्षमस्व तावत्। न मे मनःप्रसादः ह्यः प्रभृति। मदर्थं हि त्वं शल्यमुपगच्छसि। तत्र नोचितं ममागमनम्। तदिच्छामि यावत्तव प्रत्यागमनं हस्तिनावत्या उदीच्ये विपिने मृगयाविनोदेन कालमपनेतुम्।

दुर्यो : सोदर! यथा तेऽभिलाषः। शल्यमादाय प्रत्यागच्छन् निरुद्वेगं त्वां द्रष्टुमिच्छामि। (कर्णं हस्ते गृहीत्वा निष्क्रान्तः)

[यवनिका]

तृतीयोऽङ्कः

[मध्येवनमेकतः कर्णस्य शिबिरम्, अन्यत्र तरोरधश्छायायां विशाले शिलाफलके हस्तनुपधाय कर्णः स्वैरं शयितः। पार्श्वे वृषसेनः हरिणपोतकं कक्षे निधाय उपलालयंस्तिष्ठति। कर्णस्य शीर्षभागे धनुषी तूणीरे च विद्येते।]

वृष : तात! ईदृशे गहनेऽपि इयती शान्ततेति विचित्रमिव प्रतिभाति। किञ्च न दृश्यतेऽत्र एकोऽपि हिंस्रो मृग इति विचित्रतरमिदम्।

कर्ण : अथ किम्। एतद्वनप्रवेशादारभ्य मे मनसि अनिर्वचनीयः कोऽप्यानन्दः। आस्तां तावत्। कुमार! कुतस्त्यः एष हरिणपोतकः।

वृष : तात! वने पर्यटद्भिरस्मदनुचरैरेकत्र स्वेच्छया विहरत्सु हरिणेषु केचिदहन्यन्त। नष्टायामस्य जनन्यां धावनासमर्थोऽयं गृहीतोऽस्मदीयैः। अस्तु नाम। तात! किमयं पोतकः जननीं विना जीवेत्?

कर्ण : (हरिणपोतकमवलोक्य, निःश्वस्य) वत्स! जननानुपदमेव मातृविहीनाः जननीलालनपोषणरहिता अपि जीवित्वा प्राप्तवयस्का भाग्यहीना बहवः किल वर्तन्ते। दृढप्राणश्चेत् अयमपि जीवेत्।

[प्रविश्यानुचरो भीतिमभिनयति]

वृष : को विशेषः? कुत एवं बिभेषि?

अनु : (शनैः) देव! कोऽपि निषादाधिपः धनुर्गृहीत्वा अतिरभसं प्रविशति शिबिरम्। तेनावश्यमेव यूयं द्रष्टव्याः। न वयं शक्नुमो रोद्धुम्।

वृष : किमिति ? किमेककं शबरं बहवो यूयमुपरोद्धुमशक्ताः ? एहि, पश्यामस्तावत्। को वायमुद्धतः ? (उत्तिष्ठति)

कर्ण : (वृषसेनं हस्तेन निरुद्ध्य) पश्यामस्तावत् कोऽयमुद्धत इति। अनुचर ! प्रवेशय तम्।

अनु : यथा आज्ञापयति देवः। (निष्क्रान्तः)

[ततः प्रविशति दीर्घकायः आजानुबाहुः व्यूढोरस्को धनुर्धारी निषादाधिपः चापधारी कश्चन कुमारश्च। निषादराजः सकृत् कर्णवृषसेनावलोक्य पुनः साग्रहं कर्णमापादशिखं वीक्षमाणस्तिष्ठति। विकसितवदनः कर्णः स्मितेन निषादाधिपमवलोक्य]

कर्ण : पुलिन्दराज ! उपविश्यताम्। क्रुद्ध इव दृश्यसे। न किमपि असाध्वाचरितमस्माभिः ?।

निषा : (कर्कशस्वरेण) विना अस्मदनुज्ञां प्रविष्टमिदं वनम्। अस्मदर्भककल्पानां हरिणानामहेतुकं हननमपि कृतम्। अयं नापकार इव प्रतिभाति किम् ? रोचते वा युष्मभ्य-मयं क्रीडाविनोदः।

कर्ण : अहो ! एतन्नु राजन् ! अपराधोऽयमस्मदनुचरैराचरितो प्यस्मदीय इति मन्यामहे। दापयामः परिहारं नष्टस्य। शान्तो भव।

निषा : राजन् ! न वयमर्थपराः। विहारापदेशेन विपिनं प्रविश्य अस्मदीयशिशुसदृशानां मृगाणां विनोदार्थमेव हननं क्षत्रि-याणां क्रीडा संवृत्ता। प्रतीकारासमर्थानां हननं न तावत् क्षात्रो धर्मः, नापि शौर्यस्य पदम्। अस्यार्थस्य बोधनार्थमेव आगता वयम्। अस्मन्मृगघातिनो युष्मत्सैनिकान् रक्षसि वा,

आहोस्वित् मया सह त्वमेव योत्स्यसे ? एवं चेदतीव मे हर्षः। इतः परं न कदापि बलहीनान् बाधिष्यसे।

वृष : शबरराज! उच्छृंखलस्ते प्रलापः। प्रश्रयानुवर्तनं ते शिक्षयामि। अवधेहि। (साग्रहमवलोकते)

कर्ण : वृषसेन! तूष्णीमास्स्व। तोषयेमं कुमारं शिबिरं नीत्वा। अहमेनं शबरनृपं प्रसादयामि।

[निष्क्रान्तो वृषसेनः शबरकुमारेण साकम्]

कर्ण : निषादराज! अविचारमूलकेऽस्मिन् विषये किं वृथा कलहेन को वा प्रत्ययः द्वन्द्वयुद्धे वयमेव जेष्याम इति। किं नाम स्वायत्ते शक्तिपौरुषे। प्रसीद, अनुसर मैत्रीम्।

निषा : राजन्! शमप्रधानान्यपि ते वचांसि शौर्यगर्भाणीव लक्ष्यन्ते। हिमशीतलानां त्वदीयानामवलोकनानां पश्चात् निगूढा काचन विस्मयनीया दृश्यते शक्तिः। आकृतिः साहसं प्रकटयति। तादृक्षेण त्वया आयोधनमेव मम अस्त्रविद्यायाः फलमिति मन्ये। अस्त्रचातुर्यस्य क्षत्रिया एव स्वामिनः इत्यस्य तथ्यस्य परीक्षायामस्ति मे महान् तर्षः। तस्मात् कोवाऽन्तरायो मया योद्धुम्।

कर्ण : (स्मित्वा) पुलिन्दराज! श्लाघनीयस्ते साहसोद्यमः। अपि तु सम्बन्धसङ्ग्रामयोरावश्यकी समतेति तवाप्यवगतम्। विनोदार्थमपि मया युद्ध्यमानस्य ते दैवात् हानिः सम्भवेत्। तस्मान्न परेषां घातुको भवानि। विरमास्माद-भिलाषात्।

निषा : (उत्तिष्ठन्) राजन् ! नन्विमानि ते निषेधवचनान्येव मां नोदयन्ति । आयोधनमेवावयोस्तारतम्यं निर्णेष्यतीति निश्चिनु । उत्तिष्ठ, चापं गृहाण ।

कर्ण : शबरभूप ! सर्वथा अभिनिवेशं न जहासीव । तथापि यदि त्वं मद्दर्शितं लक्ष्यमेकपदे भेत्स्यसि तदाहं त्वया सह योत्स्ये (ऊर्ध्वमवलोक्य, वियति पतन्तं विहङ्गमगणं प्रदर्श्य) पश्यसि ननु पतत्रिपङ्क्तीः । प्रथमपञ्चमनवमपङ्क्तिषु प्रथमं, पञ्चमं, नवमं च त्रिभिर्नाराचैः सकृत्प्रयुक्तैः पातय, पश्यामस्तावत् ।

निषाद : (प्रहस्य) किमिदमेव लक्ष्यम् ? (दक्षिणेन चापं गृहीत्वा सव्येन पाणिना सन्धाय मार्गणान् प्रयुङ्क्ते । पक्षिणः पतन्ति)

कर्ण : (साश्चर्यसंभ्रमम्) किरातचक्रवर्तिन् ! न्यमज्जयस्त्वं माम् आनन्दसागरे । कर्णार्जुनावन्तरा न सुलभमीदृशं लक्ष्य-भेदनमन्येषाम् । (तस्य स्कन्धे हस्तं निधाय निर्भरमवलोकयन्) दक्षिणेतरेण पाणिना बाणप्रयोगे को वा हेतुः ? किमेष व्यत्ययो जन्मसिद्धः ?

निषाद : राजन् ! नैवम् । पुरा अहमपि दक्षिणेनैव पाणिना-शरसन्धानं कुर्वाण आसम् । (अङ्गुष्ठरहितं दक्षिणहस्तं दर्शयन्) ईर्ष्यापरस्य कस्यचित् क्षत्रियकुमारस्य कृते अङ्गुष्ठ-रहितोऽभवम् । पश्चाद्वामेनैव पाणिना बाणप्रयोगमभ्यस्त-वान् ।

कर्ण : अहो ! आश्चर्यमिदम् । सविस्तरं श्रोतुमिच्छामि ।

निषा : कस्तत्र विस्तरः । गुरुभ्यो दक्षिणाप्रतिनिधितया ममाङ्गुष्ठं समार्पयम् ।

कर्ण : (ससंभ्रमम्) किम् ? किमेकलव्यः ?

निषा : राजन् ! अथ किम् । को भवानिति ज्ञातुमिच्छामि ।

कर्ण : (सहर्षमेकलव्यमालिङ्ग्य) एकलव्य ! इदं मे सुदिनम् । अहो मम भाग्यविशेषः, यत्त्वया शौर्यनिधिना अस्त्रविशारदेन समागमोऽभूत् । नन्वहं सौहृदप्रतिनिधितया मदीयमङ्ग-राज्यं त्वयि समर्पयितुमिच्छामि ।

एक : (मुकुलितहस्तः) स्वामिन् ! प्रभो कर्ण ! नाज्ञासिषमहं त्वाम् । क्षमस्व ।

कर्ण : सोदर्य ! अहमङ्गविषयस्य राजा । त्वं तावत् अस्त्रविद्या प्रपञ्चस्य सार्वभौमः । को वाहं क्षन्तुम् ? तथ्यं ब्रवीमि । अतिशेते भवान् मामस्त्रविद्याकौशले ।

एक : स्वामिन् ! प्रभु सरलभावः एवं मन्यते । परन्तु व्यर्थमिदं प्रावीण्यम् । पार्थेनाप्रतिस्पर्धमानयाऽनया शस्त्रचातुर्या किं वा प्रयोजनम् ।

कर्ण : (साकूतम्) किमिति ? किरीटिना योद्धव्यमित्यभिलाषो नु ? किमस्त्रविद्याप्रकटनमेव तवाभिलषितम् ?

एक : प्रभो ! न कदाचित् । अर्जुनार्थ एव खलु मदीयाङ्गुष्ठापोहः । तदर्थमपि न शोचामि । गुरोः प्रेष्ठेनान्तेवासिना तेन गृहीता विद्या कियत्परिमितेति परीक्षितुमिच्छामि । अयमेव मे जीवितोद्देशः ।

कर्ण : (सविमर्शं स्मृत्वा) एकलव्य ! न योत्स्यते पार्थस्त्वया साकम् । अस्त्येक एव मार्गः तादृशावकाशलाभाय । किं साहसमवलम्बितुमिष्टम् ?

एक : यद्यर्जुनेन साकं नियुद्धमुपलभेय तदर्थं सज्जोऽहं क्रियतेऽपि साहसाय । प्रभो ! भवदाज्ञां प्रतिपालयामि ।

कर्ण : एकलव्य ! भविष्यति खलु अचिरादेव कुरुपाण्डवयोरायोधनम् । यदि भवानभिमन्यते कुरुपक्षसाहाय्यं, तदा सिद्ध्यति भवदभिलाषः । इममाशयमनुमन्यसे चेत् कुरुसार्वभौम एव त्वामाहूय सम्भावयिष्यति ।

एक : (सहर्षोत्साहम्, कटिप्रदेशात्कौक्षेयकमुत्सार्य, मणिबन्धरक्तसिक्तं कृत्वा कर्णस्य हस्ते निदधाति) महाराज ! इदमेव मे प्रत्युत्तरम् । त्वदर्थं प्रस्यन्दयामि मदीयं लोहितम् । करिष्येऽहं गुरोः समक्षं अस्त्रप्रयोगविकलं पार्थम् ।

कर्ण : सोदर ! महान् सन्तोषः । श्वोभूत एव कुरुसम्राजमानीय कल्पयिष्यामि स्नेहबन्धम् । सज्जो भव !

एक : प्रभो ! वनेचरो नार्हामि तादृशीं सम्भावनाम् । प्रतीक्ष्य सार्वभौमस्यावसरमहमेव तद्दर्शनार्थमागमिष्यामि ।

कर्ण : एकलव्य ! किमन्तरमावयोः शूरयोः । स्नेहैकवश्यः सुयोधनः त्वां सोदरनिर्विशेषं सम्भावयिष्यति । धनञ्जयविजृम्भणनिर्वापणक्षमः वीराग्रेसरो लब्ध इति मे मनः निश्चिन्तमभवत् । न दृश्यते वेला मम प्रमोदसागरस्य । रक्षतु पार्थं कृष्णः । (एकलव्यं हस्ते गृहीत्वा निष्क्रान्तः)

[यवनिका]

चतुर्थोऽङ्कः

[विदुरगृहैकदेशे पूजामन्दिरम्–पुरस्ताच्चन्द्रकान्तशिलावेदिकायां गन्ध-पुष्पाक्षतालंकृता देवमूर्तयः। पार्श्वयोरुत्तम्भिता दीपावलयः। सज्जानि फल-पुष्पादीनि द्रव्याणि। स्नाता च शुभ्रकौशेया, अंसावलम्बिक्लिन्नकचभरा कुन्ती ध्याननिमीलितनयना, बद्धाञ्जलिः उपविश्य]

कुन्ती : दयानिधे! किं न शृणोषि मदीयामभ्यर्थनाम्। दुःख-भाजनमिदं जीवितमितोऽपि कियन्तं कालं मां अतिवाह-यिष्यसि? बाल्य एव मदीयान्तरङ्गे अनिर्वापणीयमनलं सन्धुक्षितवानसि। अशरणा कर्तव्यमूढाऽहम्, नितरां इतर-निवेदनाक्षमया वेदनया खिद्ये। मदीयान्यपदानानि प्रत्यङ्ग-प्रवाहेण सिरासु प्रसृत्य, अस्थिषु स्थित्वा अनुक्षणमसून् उन्मूलयन्ति। इतः कस्या वा दण्डनायाः भागिनीं करोषि? यां कां वा यातनां अहमनुभवेयम्। रक्ष मे पुत्रकान्। मा कार्षीर्मां पुत्रशोकभागिनीम्। माननीयमग्रजं हन्तु-मनुजः, प्रेष्ठमनुजं हन्तुं अग्रजश्चोद्युक्तौ। दह्यते मे हृदयम्। जीर्णेऽस्मिन् शरीरे एकैकोऽपि परमाणुः प्राणयात्रां समा-पयितुमुत्सुकः। भयानकमिदं द्रष्टुं नशक्नोमि। आबाल्यात् निद्रावस्थायामपि मनःशान्तिगन्धशून्येन दुःखभूयिष्ठेन ममा-नेन जीवितदृश्येन को वा तवानन्दो भवति? परमेश्वर! करुणामय! उत्सारय तपस्विनीमिमामस्माल्लोकात्। अनु-गृहाण शाश्वतीं शान्तिम्। [प्रणमति-अन्नान्तरे कोऽपि कवाटं

शब्दापयति, कुन्ती वाष्पकलुषिताभ्यां नेत्राभ्यां पश्यन्ती, सासूयं 'को वा मद्ध्यानस्य भङ्गमापादयति'—इत्यन्तरङ्गे खिन्ना कवाटमुद्घाट्य]
कोऽत्र ? अन्तरागम्यताम्।

[फलभरितसमुद्गहस्तः युयुत्सुः प्रविश्य पादयोः प्रणम्य चोत्थाय]

युयु : अम्ब ! क्षमस्व भवत्याः विविक्तध्यानान्तरायमिमं जनम्। सपर्याया अवसरे जननीप्रसादलोभेनागतोऽस्मि।

कुन्ती : वत्स ! युयुत्सो ! प्रियं मे। त्रयोदशवत्सरान् एकाकिन्या स्थितायाः मम का वा हानिर्विविक्तध्यानस्य ? न जानीषे किं तवागमनं मम आनन्ददायकमिति ?

युयु : जननि ! लोकैकवीराणां धर्मविवर्तानां कुमाराणां प्रसवित्री भवती कथमेकाकिनी ? दुस्सहं दीर्घकालवियोगदुःखमेवं त्वां भाषयति। कियानिव कालस्तवास्य विरहस्य ? भवतु। ननु तवाहं पुत्त्रनिर्विशेषः। किं न ते स्वतन्त्रता मदीयसपर्या-परिग्रहणे ?

कुन्ती : वत्स ! मन्यते मदीयमन्तःकरणं पुत्रेभ्यो निरवधिकप्रेमभक्ति-भरितं शुश्रूषमाणं भवन्तम्। मत्कृते भवान् भ्रातृभ्यो दूरीकृत इति नितरां व्यथयति मामियं चिन्ता।

युयु : मातः ! न भवती हेतुरस्मद्भ्रातृभ्यो मम दूरीकरणस्य। सत्यधर्मावेवात्र कारणम्। यदा मध्येसभं भारतसतीत्वं दूषितं तदैव विपक्षीभूतोऽहं सोदराणाम्। प्रस्थितोऽहम् अरण्यनिवासाय पाण्डवैः साकम्। अपितु, पुण्यमूर्तेः भवत्याः इहावस्थानं निमित्तीकृत्य यथाशक्ति तव हृदय-तापोपशमनायैव निश्चितं मया इमान् त्रयोदशहायनान्

अत्रैवावस्थातव्यमिति। प्रागेव युद्धारम्भात् धर्ममूर्तिं युधिष्ठिरमुपगन्तुं गच्छेयमिति पुरैव सङ्कल्पितम्। अम्ब! ननु भवत्या शोच्यो भवेयम् यद्यहं धर्मन्यायविधुरः स्याम्, न च पापदूरः।

कुन्ती : वत्स! जाने भवतश्चित्तवृत्तिम्। मा कार्षीः साहसम्। दैवायत्तौ रणे जयापजयौ। मा मुधा पित्रोः व्यथां जनय।

युयु : अम्ब! कः कालो युद्धोदर्कस्य—निश्चितस्य। कुलवधूकचर्याः पापिहस्तपरामर्शादनुपदमेव नष्टाः कौरव्याः। दोषभूयिष्ठा इयं हस्तिनावती नाद्यापि भूगर्भलीनेत्यत्र त्वादृशपुण्यमूर्ते रत्रावस्थानमेव कारणम्। किञ्चाहं धर्मपक्षसङ्गमाभिलाषी, नेतराभिलाषी। [नेपथ्ये कलकलः। "विजयतामस्त्रविद्याविशारदः। विजयतां पार्थप्रतिवीरः।" उत्थाय पृथा कोलाहलमाकर्ण्य, ससंभ्रमं युयुत्सुमवलोक्य]

कुन्ती : वत्स! कोऽयं कलकलः। केनापि विशेषेण भवितव्यम्।

युयु : अम्ब! विस्मृतं मया निवेदयितुम्। पाण्डवपक्षवीराणां प्रतिवीरनिर्णयार्थं अद्य प्रवृत्तं शस्त्रास्त्रप्रदर्शनम्। तत्र कर्णेनानीतेन किरातराजेन प्रदर्शितोऽद्भुतः शस्त्रास्त्रप्रयोगः। निर्णीतोऽयं पार्थप्रतिद्वन्द्वितया। प्रमदतुन्दिलेन सुयोधनेन स्वीयरथमारोप्य प्रासादं नीयते खलु शबरभूपः। तस्योत्सवस्यैवायं कोलाहलः।

कुन्ती : कथम्? किरातमेकमर्जुनप्रतिद्वन्द्वितया निश्चितवान् कर्णः? भीष्मद्रोणावन्वमन्येताम्?

युयु : अम्ब। अभिज्ञा खलु भवती सर्वेष्वस्मासु द्रोणादस्त्रविद्यामभ्यस्यत्सु निर्वृत्तस्यैकलव्योदन्तस्य। तदारभ्य पार्थनिग्रहेच्छया अभ्यस्तवान् खलु एकलव्यः शरसन्धानं दक्षिणेतरेण पाणिना। सोऽधुना पार्थनियुद्धाभिलाषी। स एवेदानीं कर्णेनानीतः किरातराजः।

कुन्ती : महताऽभिनिवेशेनास्त्रविद्यापरिश्रमं कृतवानपि किंवाऽयं कर्णतुल्यो भवेत्? आत्मपरिपन्थिनः पार्थस्य प्रतिद्वन्द्वितयास्य किरातस्य निर्णयः? किं न हीयतेऽनेन कर्णस्य प्रतिष्ठा?

युयु : अम्ब! अतिशेते अयं किरातः कर्णं पार्थमपीति कर्णस्य निश्चितोऽभिप्रायः। न हीयतेऽयं कर्णार्जुनाभ्यां इत्यभिप्रेत्याचार्योऽपि। स्वस्य अस्त्रपरित्यागेन संभाविता हानिरपि निर्वर्त्यत इति हृष्यति कर्णोऽपि। वृत्तान्तोऽयं पाण्डवैरवश्यं ज्ञातव्य इति मन्ये।

कुन्ती : (सावज्ञम्) युयुत्सो! भवतु नामैकलव्यः शस्त्रविद्यापारंगतः। अपि तु अस्त्रमन्त्रानभिज्ञः क्षत्रियेतरः स किरातः न शक्नोति पार्थस्य दिव्यास्त्राणां प्रतिकर्तुम्। परं विजेष्यते पार्थोऽमुं हेलया। नास्त्यत्र चिन्तावकाशः।

युयु : प्रमादः खल्वयम्। प्रकटितवान् खल्वमुमभिप्रायं पितामहोऽपि। अवगत्यैवेदं सज्जः खलु कर्णोऽपि तस्मै दिव्यास्त्रमन्त्रानुपदेष्टुम्। तदनुगुणाः प्रयत्ना अपि निर्वर्त्यन्ते। तस्मान्न युक्तमधुना उपेक्षितुम्।

कुन्ती : (सोद्वेगमुत्थाय) अहो ! तथा नु। कोऽयं कर्णस्याभिनिवेशः ? किमर्जुननिग्रहे तावानभिलाषः कर्णस्य ? न जाने किंवा पार्थवैरम्, आहो नु स्वामिकार्यतत्परता। (विचार्य) भवतु। श्रेयानयं वृत्तान्तः कृष्णे विज्ञापितः। निश्चिनुमः विदुरेण साकमामन्त्र्य कर्तव्यशेषम्। (निष्क्रामतः)।

[यवनिका]

पञ्चमोऽङ्कः

[उपप्लाव्यनगरे पार्थप्रासादस्य एकदेशः। 'विविधशस्त्रास्त्राणि कुड्येषु तत्र तत्र निचितानि। उन्नतासनारूढः कृष्णः पार्श्वे आसीनः पार्थश्च प्रविशतः]

कृष्ण : सखे! कुत इयान् प्रमादः? किमु सांप्रतं युष्मन्मातुलं शल्यं दुर्योधनपक्षीयं कर्तुम्? नासीत् किं अवकाशः स्वयमेव तदाह्वानाय?

अर्जुन : कृष्ण! महानयं प्रमादः। अस्मत्सङ्गमनोत्सुकः शल्यः मध्येमार्गं दुर्योधनादिभिर्वञ्चितः खलु। नासीच्चावकाशोऽस्माकं स्वयमेव तमानेतुम्। अयमपरः प्रमादः। उपेक्षितवानार्यो धर्मजोऽपि।

कृष्ण : का वा दरिद्रता आर्यस्योपेक्षायाः? धर्मप्रभुः खलु। मय्यपि परिपन्थिपक्षमाश्रिते स तावद्दैवन्यस्तभारः निर्व्याकुलस्तिष्ठेत्।

अर्जुन : कृष्ण! अयमार्यस्य गुणविशेषः। कथञ्चिदपि धर्मो विजयत इति तस्य मतम्। अपि तु लोके तावत् धर्मन्याय्ययोः प्रवृत्तिः एतन्मतविरुद्धा दृश्यते। आबाल्यात् न्यायादनपेतानां धर्मैकशरणानां अस्माकं को वा लाभः? का वा-हानिरधर्मवर्तिनां कौरवाणाम्?

कृष्ण : अर्जुन! माभूः कृपणः। किमैहिकसुखलाभेनैव धर्मन्याय्ययोः निर्णयः? अतीन्द्रियः खलु धर्मः। तस्य फलमपि न करणगोचरम्। एकान्तमाश्रित्य विविक्ते सम्यग्विचार्य ब्रूहि। न्याय्यपथानुवर्तिभिः युष्माभिः सम्यङ्निवर्तितः

वनवासः, उत सुयोधनादिभिरिवानुभुक्तो राज्योपभोगः, कोवात्र आनन्दावहः ? त्वमेव लप्स्यसे सुष्ठूत्तरं तव प्रश्नस्य। किञ्च कौरवाः अमितानन्दभागिन इति च केवलं भ्रान्तिरेव। अनभिज्ञः खलु भवान् एतांस्त्रयोदशवत्सरान् धृतराष्ट्रदुर्योधनादिभिरनुभूताया मानस्या यातनायाः। तीर्णप्रतिज्ञाः पाण्डवाः कदा वा आगच्छेयुः पालयेयुश्च तेषां शपथानित्यनुक्षणं मनश्शान्तिगन्धहीनैरेव तै रभूयत। वञ्चिताः खलु ते निद्रासुखेन। अनवरतमनुभूयमानमानसक्षोभशतपरंपरया नितरामशान्तं तेषां जीवितम्। न ते यूयमिव प्रसन्नशान्तस्थिरचित्ताः। ईदृगैहिकसौख्यमार्जितं युष्माभिः।

अर्जुनः कृष्ण ! अहमभ्युपैमि सत्यमुपलब्धा मनःशान्तिरिति। परमास्तांतावदस्माभिर्नोपलब्धमैहिकं सुखं धर्माचरणेनेति। किमिदमपि धर्मैकजीवितफलम्, यत्पाञ्चाल्या अनुभूता महती विपत्परंपरेति। तपस्विन्या पृथयाऽप्यनुभवन्त्या पुत्रविरहं परपिण्डरतया दुःखदुःखं असवो ध्रियन्ते इतीदमपि धर्मफलं ननु।

कृष्णः पार्थ ! तदेव प्रकृतितत्त्वम्। दूरीकृत्य ममतां सतीति मातेति विमृशसि चेत्सुबोधं तदानीं ते जीवितरहस्यं भविता। दृश्यते खलु पित्रोरपराधेन लोके निरागसः पुण्यपापगन्धशून्याश्चार्भका बाध्यन्त इति। कोऽयं धर्मः मातृभुक्तेनापथ्येनाहारेण शिशवः पीड्यन्त इति। किमु मन्यसे त्वत्पक्षावलम्बिनी सप्ताक्षौहिणीमितेयं पृतना युद्धावसानेऽपि जीवेदिति। किं जानीषे कति वा आप्तबान्धवाः

प्रेयांसः मित्राणि धर्मसङ्ग्रामेऽस्मिन् नश्येयुरिति। निर्ममत्वेन विमृशन् ननु ज्ञास्यसि जीवितरहस्यम्। पूर्वजन्मकर्मायत्तं खलु जीविनां जीवितम्। तस्मादधर्मो वलीयान् सुखावहः इति भ्रान्तिं विसृज।

अर्जुन: कृष्ण! कुतो मे दुरधिगमेष्वीदृशेषु शास्त्रविषयेषु विवदितुं पाण्डित्यम्। यद्येवं मानवस्य सुखदुःखे न पुण्यपापायत्ते किंव्यपाश्रयं जीवितवर्तनम्? प्राणी वा कुतः प्रयतेत धर्ममार्गानुवर्तनाय?

कृष्ण: पृथानन्दन! दुरवगाहं खलु धर्मतत्त्वम्। प्राणिनां दुस्साधः तत्स्वरूपनिर्णयः। अतीन्द्रियस्य धर्मस्य रक्षणार्थं कदाचित् नश्येयुरनेके निर्दोषाः। कृत्स्नमिदं विश्वं रक्ताप्लुतं भवेत्। कृतेऽपि महति प्रयत्ने दैवविमुखतया धर्मस्यापि हानिरापद्येत। कदाचिद्दैवे सुमुखेऽपि पुरुषप्रयत्नलोपेन धर्मोऽपि न फलेत्। प्रकृतिजडतया मनोदौर्बल्येन च धर्मरक्षा न घटेत। सततप्रयत्नबलेन अकुण्ठितचैतन्येन, अक्षय्यान्तरशक्त्या, निर्ममेन मनोनिग्रहेण निरहङ्कारेण निष्कामकर्मणा च भाव्यं धर्मस्य रक्षणम्।

[ततः प्रविशति पायसपूर्णहेमपात्रहस्ता द्रौपदी]

द्रौपदी: अग्रज! स्वगृहबाह्याः क्षत्रियानुचितवृत्तयः विराटौदार्यजीविनो न शक्नुमो वयं भवन्तं यथोचितं संभावयितुम्। परकीयमपि द्रव्यं स्वहस्तपक्वमित्यभ्यर्थये, स्वीक्रियताम्।

कृष्ण: (स्मित्वा) भगिनि! यत्र कुत्र स्थिताऽपि वीरपत्नी खलु भवती। न चिरादेव लब्ध्वा पुनः स्वसाम्राज्यं धर्मस्यैव

आतिथेयी भविताऽसि। इमांस्त्रयोदशापि शरदः तदर्थाः खलु सर्वेऽपि पार्थप्रयत्नाः।

द्रौपदी : कृष्ण! नास्माकीनः प्रयत्नः, तवैव प्रोत्साह इति भण। विराटस्यावासे चिरादभ्यस्तानुचितवृत्तीनां गलितमिव मन्ये क्षात्रं तेजः। जपतपोहोमादिषु श्रौतकर्मसु नृत्यगीतादिललितकलासु च निरूढोऽभिलाषः। अत एव खलु ग्रामपञ्चकाभ्यर्थनाय भवानपि प्रस्थापितः कुरुसार्वभौमं प्रति। [स्मितेन पार्थमवलोकते]

अर्जुन : (प्रहस्य) कृष्ण! किमत्र चित्रम्। कृष्णवर्त्मजन्मा ते स्वसा उद्यत्स्फुलिङ्गेति।

कृष्ण : अर्जुन! स्त्रीभ्य एव शिक्षितव्यः स्वाभिमानः। ग्रामपञ्चकेन सन्धिविषये भवत्प्रसूरपि वैमुख्यमेव सूचयामास।

[कञ्चुकी प्रविश्य]

कञ्चुकी : देव! हास्तिनं प्रति देवप्रेषितः प्रणिधिर्द्वारि तिष्ठति। विविक्तविज्ञापनीयं किञ्चिदस्ति तस्य।

अर्जुन : अनुजानीहि नौ गमनाय। निर्वृत्ताधिकारेण त्वया प्रस्थातव्यं भोजनाय सुभद्रामन्दिरम्। स्वसा ते मिष्टान्नदायिनी। (द्रौपद्या सह निष्क्रान्तः)

[उपसृत्य जाङ्गलनामा प्रणिधिः साष्टाङ्गं प्रणम्य तिष्ठति]

कृष्ण : जाङ्गल! अविलम्बेनागतोऽसि। अस्ति किमपि नूत्नम्?

जाङ्ग : देव! विज्ञापयामि श्रुतं। श्रुतं देवेनापि यद्भीष्मवचनात् क्रुद्धेनाङ्गराजेन कृतः शस्त्रत्यागः इति। तदनु पार्थविजृंभणं निरोद्धुम्, निगृहीतुं च तं कर्णेनैको महावीरः आनीतः।

कृष्ण : पार्थनिग्रहीता महावीरः कश्चिदुत्पन्नः इति? कोऽसौ वीरः? किं सम्यक् ज्ञात्वा आगतोऽसि?

जाङ्गल : देवोऽप्यभिजानाति पार्थस्यैकलव्यस्य च बाल्योदन्तम्। स एवायमेकलव्यः। तमिमं वृत्तान्तमुपलभ्याम्बया पृथया स्वामिने प्रहितमिदं पत्रम्। अतः परं देवः प्रमाणम्। (यच्छति)

कृष्ण : (शान्तमनाः पठित्वा, किञ्चिदालोच्य) अहो धर्म्ये पथि अयमेकलव्यप्रतिबन्धः सञ्जातः। भवतु, जाङ्गल! कीदृशी कौरवाणां स्थितिः?

जाङ्गल : देव! अनल्पा कौरवाणामनीकिनी विजृम्भते अमितेनोत्साहेन। 'नाहं शस्त्रं धरेयम्' इति प्रतिज्ञातवान् कृष्णः कथं वा पार्थं रक्षिष्यतीति कुरवोऽपि नितरां विजृम्भन्ते।

कृष्ण : अहो! तथा नु। (स्वगतम्) पश्यन्तु नाम कथमहं रक्षिष्यामीति (प्रकाशम्) सुष्टु। जाङ्गल! दारुकस्तावत् आनीयताम्।

जाङ्गल : यथा आज्ञापयति देवः। (इति निष्क्रान्तः)

[यवनिका]

षष्ठोऽङ्कः

[मध्येऽरण्यं चापहस्तः कृष्णो, दारुकश्च]

कृष्ण : दारुक ! किमेष एवास्मत्किरातनिर्दिष्टः प्रदेशः स्यात् । नात्र भ्रमः ?

दारुक : देव ! नास्त्यत्र संशयः । कर्णसुयोधनावत्रागत्य व्याधराजेन सह कृत्वा सुचिरसल्लापं प्रतिगताविति आस्माकीनैः शबरैः साकमत्रागत्य प्रत्यक्षीकृतं मयाऽपि । (परितोऽवलोक्य हस्तेन निर्दिशन्) देव ! यः कृष्णसारं चारयन् तटाकमार्गादागच्छत्ययमेव किरातराजः ।

कृष्ण : (सम्यक् निरूप्य) दारुक ! अपसरास्मात्प्रदेशात् । प्रतीक्षस्व मां रथेनारण्याद्बहिः हस्तिनावतीमार्गे । निर्वर्त्य कार्यमनेनाहं त्वामुपगच्छामि ।

दारुक : यथा आज्ञापयति देवः । (निष्क्रान्तः)

कृष्ण : [सविलासं कञ्चित्तरुमाश्रित्य मन्द्रस्वरेण मधुरं गायन्नास्ते । एकलव्योऽपि अनवहितं प्रविश्य कृष्णस्य कण्ठध्वनिं श्रुत्वा चकितः उपसृत्य सविकल्पम्]

एकलव्य : राजन्! आकल्पोऽयं ते क्षत्रतां सूचयति । मन्ये विनोदार्थं प्रविष्टोऽरण्यपरिसरमिति । यद्येवं स्वागतम् ।

कृष्ण : किराताधिप ! तथ्यम् । राजन्य एवाहम् यथा भवानभिमन्यते । श्रुत्वा वर्तन्तेऽत्र अनेके वन्यमृगा इति मृगयासक्तोऽहमागतः ।

एकः : राजन्। न हि अयमत्र पूर्यते यदि मृगयाविनोदे तवाभिलाषः। न सन्त्यत्र हिंस्राः शार्दूलादयः। तस्मात् परावृत्य गम्यताम्।

कृष्ण : शबराधिप! दृश्यते खलु तत्र स्वच्छन्दो हरिणगणः। उत्पततो धावतश्च लक्ष्यस्य भेदनेनैव धन्विनः कौशलं प्रदृश्येत। का वा चातुरी शार्दूलहनने।

एकः : (गम्भीरस्वरेण) राजन्! भवतु ननु राजन्यानां क्रौर्यमेव कुलोचितमाक्रीडनम्? भवतु, नाम। प्रतिक्रियाशक्तिरहितानां प्रशान्तप्रकृतीनां हननस्य नास्त्यत्रावकाशः। अनाथानां अहमेषां गोप्ता।

कृष्ण : (प्रहस्य) किमिव? लोकेऽस्मिन्नशरणानां सर्वेषां सत्त्वानां भवान् रक्षिता?

एकः : भुवनस्य गोप्ता भगवानेव। निखिलानां दीनानामवनमेव तस्य दीक्षा। मन्येऽहमपि तत्सङ्कल्पनिर्वहणे ईषन्मात्रं साधनमिति। प्रत्येमि वनेऽस्मिन् हरिणानां निर्बाधं रक्षणमात्मनो धर्म इति।

कृष्ण : किरातराज! मा प्रविश धर्माधर्मविचारणे। हरिणेषु ममतायुक्तो भवान् एतान् रिरक्षिषुर्भवति। न तावत् अशरण्याः प्रशान्तवृत्तयो अवश्यं रक्षणीया इति। एकतः अधर्माय अन्याय्याय च दत्तावलम्बेन भवताऽन्यत्र कुतो वाऽयं धर्मोपन्यासः।

एकः : (सक्रोधम्) कथम्? किमहमधर्मपरः। भण! किमधर्मकार्यमनुष्ठितमस्मिन् मम जन्मनि।

कृष्ण : पुलिन्दराज ! कुतोऽमर्षः निगदिते तथ्ये ? अधर्मपराणां उन्मार्गप्रवृत्तानां कुरूणामाश्रित्य पक्षं धर्मस्वरूपान् पाण्डवान् जिघांसुर्भवान् धर्मरक्षको ननु ! (प्रहसति)

एक : (निरुत्तरः कञ्चित्कालं स्थित्वा) राजन् । ननु भवेयुः कुरवः उन्मार्गगामिनः । न तावदहं योत्स्ये तेषां विजयाय । पार्थपराभव एव मदीयोऽभिलाषः ।

कृष्ण : पार्थस्य निग्रहः पाण्डवानां पराजये कुरूणां विजये च पर्यवस्यति । न भवति हेतुः भवांस्तस्य ? लोके पार्थनतिशयानो धन्वीति कीर्तिकामः धर्मस्य लुम्पको भवितासि । जानीहि तावत् ।

एक : (निरुत्तरः कृष्णमवलोकते) ।

कृष्ण : किरातराज ! दृश्यसे गृहीतवानिव मद्वचसां सत्यताम् । नाद्यापि किञ्चिदत्याहितम् । अपाकृत्याधर्मस्य पक्षं उररीकुरु पाण्डवानां पक्षम् । यदि नेच्छसि तटस्थो भव । कुतो वा बुद्धिपूर्वमन्यायावलम्बी भवेः ।

एक : (सत्वरम्) राजन् ! धर्मो वा भवतु, अधर्मो वा भवतु । अविमृश्यकारिणा मया दत्तं वचः । अधुना विज्ञायापि कथमहं करिष्ये वचोभङ्गम् ? न सम्भवेत्तत्कदाचिदपि । भवतु । विषयेऽस्मिन्नतीव श्रद्धां वहन् भवानपि कोऽत्रेति प्रष्टुमिच्छाम्यहम् ।

कृष्ण : पुलिन्दराज ! धर्मप्रस्तावनावसरे वक्तव्यमिदानीं मया । पार्थपरिरक्षणे तीव्रप्रतिज्ञे कृष्णे मिथ्या खलु त्वम् अर्जुनस्य

विजेनेति। परंतु त्वमधर्मपक्षमाश्रित इति दुर्यश एव अर्जितवान् भवेः। सम्यक् विमृश।

एक्रः: भीष्मद्रोणयोरिव ममापि दुर्यशो भवेत्। प्रामादिकस्य अपराधस्य समीकरणाय बुद्धिपूर्वकं नोत्सहे मद्वचसो भङ्गमापादयितुम्। यद्येवं 'नाहं शस्त्रधारी' इति प्रतिज्ञातवान् कृष्णः रक्षत्येव पार्थमिति न शक्यते खलु वक्तुम्।

कृष्ण: उन्मत्त! भीष्मद्रोणादिभ्यः पाण्डवान् रिरक्षिषुः कृष्णः त्वत्तोऽपि तं किं न रक्षेत्। प्रागेव युद्धारम्भे हन्याद्वा कृष्णो भवन्तम्। तदानीं का वा कीर्तिस्ते लम्भनीया?

एक्रः: विना कारणं कृष्णः कथं वा प्रवर्तेत तादृशे अकार्ये। निरागसि मयि तस्य किं वा वैरम्?

कृष्ण: भवद्रक्षितव्यानां हरिणानां जिघांसुरहं यथा ते परिपन्थी, तथैव आत्मना रक्षणीयानां पाण्डवानां जिघांसुर्भवानपि वध्य एव कृष्णस्य। तस्मात् कृष्णस्त्वां कुतो न हन्यात्?

एक्रः: भवतु! भवतु नामासौ मम शत्रुः। हन्तु नाम कृष्णो मां युद्धे। महान् प्रमोदो मे। न कोऽपि शूरो वीरमरणात् बिभेति।

कृष्ण: (विकटं विहस्य) कृष्णस्त्वया युद्ध्यति वा। उन्मत्त! युद्धे एव हन्यामिति को वा निर्बन्धः कृष्णस्य? हरिणहिंसकान् सिंहशार्दूलादिघातुकमृगान् सर्वानपि भवान् युद्धे एव हतवान् किम्? निसर्गतः एव स्वेषामाहारभूतानां हरिणानां हिंसनेन शार्दूलादयो भवतो अवश्यवध्याः सञ्जाताः। हरिणविषयकममतया कति वा प्रसुप्तान् द्वीपिनः, पोतकान्

पाययन्तीः सिंहीः, कुञ्जेषु क्रीडमानान् शार्दूलपोतकान् आत्ममार्गणानामाहुतिमकरोः ? किमभिप्रैषि सोऽपि धर्म-युद्धमेवेति ?

एक : राजन् ! ते खलु परहिंस्रकाः क्रूरमृगाः ! तेषु कथं मानवो धर्मः प्रवर्तेत ?

कृष्ण : किरातपुङ्गव ! मन्यसे वा प्रकृतिसिद्धं मानवत्वमिति। मानवत्वं पशुत्वं वा गुणशीलायत्तम्। न तावत् बाह्य-रूपायत्तम्। किं मन्यसे कंसमागधादयोऽपि मानवा एवेति? सतीमणिं कुलवधूं मध्येसभं तादृशीमवस्थां नीतवन्तो घातुकमृगेभ्योऽपि अधमा एव। को वा संशयः तादृशनररूपराक्षसानां हितकारिणः त्वादृशा अपि राक्षसा एवेति अवश्यमेव हन्तव्या इत्यत्र च।

एक : राजन्! न शक्तोऽहं विवदितुं त्वया। प्रियं मे यदि कृष्णो मां हन्यात्। पार्थसंरक्षणाय कृष्णो हतवान् एकलव्यमिति कीर्तिर्ननु भवति। विद्धि मां स्थिरप्रतिज्ञम्।

कृष्ण : सत्यम्। न हीयते तादृशं यशस्ते कदापि। भवतु।

[झटिति कौक्षेयकमादाय एकलव्यं हृदये निखनति]

एक : अहो अत्याहितम् !

कृष्ण : (साक्रन्दं पतन्तं तमादाय दोर्भ्यां स्वाङ्के उपवेश्य सशिरोमर्शं) एकलव्य! समाश्वसिहि। अवहितः पश्य कोऽहमिति। (हस्तेन नेत्रे सम्मार्ष्टि)।

एकः (शिर उन्नमय्य, कृष्णस्य मुखमुद्वीक्ष्य, हस्ताभ्यां नेत्रमाच्छाद्य, शिरोऽवनम्य) देव ! न पारये ते नेत्रज्योतिः सोढुम् । निमीलतो मे नेत्रे ।

कृष्णः कुमार ! ननु कृष्णोऽहम् । यद्यप्यनभिज्ञो लोकस्ते अस्त्रकौशलस्य, परमहं जानाम्यतिशेते भवान् पार्थमिति । तस्माद्वध्योऽभूः पार्थस्य धर्मस्य च रक्षणाय । अचिरेण भाविनं धर्मसंग्रामं वियति दिव्यविमानमध्यासीनः प्रेक्षिष्यसे पितरः पितामहाः सोदर्या बान्धवा हितैषिणो मित्राणि शिष्यपुत्रादिसम्बन्धविवक्षाविहीनाः विस्मृत्य लौकिकीं वृत्तिं कथमिव स्पर्धन्ते, कति वा नश्यन्तीति । धर्मरक्षणैकफलेऽस्मिन् भारतसङ्ग्रामाध्वरेऽभूद्भवान् "मुखाहुतिः" । रागद्वेषमोहावेशविवशानां अन्योन्यं जिघांसूनां कुरुपाण्डववीराणां अपि दुर्लभां गतिं प्राप्स्यसि । ममतादिकं विधूय भागवते धाम्नि विलीनो भव । न स्यात्ते जनुः पुनः ।

एकः देव ! सत्यमहं न खिद्ये । निवर्तितोऽस्मि नितरामधर्मपक्षायोधनादिति तुष्यामि । तवाङ्के एव शयानस्यासुवियोगयोगः समजनीति परमो मे आनन्दः । तथापीयमेवाभ्यर्थना । मदेकदृष्टिर्जननी मे अतिवृद्धा नितरां रुग्णा न जाने कदा वा जीवयात्रायाः विरमतीति । अनतिदीर्घेऽस्मिन्नवसरे पुत्रशोकनिर्विण्णायास्तस्याः कियती वेदना स्यादिति महती मे चिन्ता ।

कृष्ण : (विचार्य) वत्स! आसन्नः खलु तस्या अपि चरमनिमेषः। त्वद्रूपधारिणो मम हस्तयोः शयित्वा त्यक्तजीविता लप्स्यते सापि विमुक्तभवबन्धां शाश्वतीं गतिम्। मा भूत्तस्याः पुत्र-वियोगमोहः। शान्तो भव। (हस्तेन तस्य नेत्रे पिदधाति)

एक : देव! अनुगृहीतोऽस्मि। (नेत्रे निमीलयति)

कृष्ण : [एकलव्यकलेवरं भूमौ निधाय, उत्तरीयेणाच्छाद्य, किञ्चिदिव स्तब्धः) आरब्धोऽयमध्वरः। उभयोः पक्षयोरष्टादशाक्षौहिणीपरि-मितेयं पृतना प्रवेष्टुमध्वरवेदिमहमहमिकया अभिगच्छति। कृपणाः मदान्धाः अधर्मैकरताः कौरवाः, अहंकारममकारो-पहताः घटोत्कचाभिमन्युप्रभृतयः, धर्मभीरवः परवन्तो भीष्म-द्रोणादयः सर्वेऽपि अधर्मपरिणामोदर्केऽस्मिन् संग्रामाग्नौ शलभप्राया भवेयुः। निर्भराभिमानैरुन्मस्तकविषयविषैः धर्म-विमुखैः, न्यायदूरैः, नीतिविधुरैः, निबिडेऽस्मिन् जगति नास्ति स्वल्पोऽप्यावसथः सत्यधर्मयोः। सैनिकाश्वदन्ति-कङ्कालभीकरः, अङ्गविकलमृतकल्पयोधवीरयातनाक्रन्दहृदय-विदारकः, मांसरुधिरमस्तिष्कास्वादरसिककङ्कगृध्रगोमायुबी-भत्सः, रुधिरपानोन्मत्तैः नरशिरःकन्दुकक्रीडाविनोदरसिकैः भूतवेतालैः भयानकः, न भवति चेद्युद्धरङ्गः लोके अह-ङ्कारः कथं वा निर्मूलो भवेत् ज्ञानप्रकाशो वा उदियात्। नदीरूपतया प्रवहत् रुधिरमिदं सप्तह्रदरूपेण स्थित्वा अस्मिन् कुरुक्षेत्रे शाश्वतं, भाविनो मनुजमात्रस्य ज्ञानजनकं भवितु-मर्हति। (एकलव्यकलेवरं दृष्ट्वा) आलब्धश्चायं 'मुखाहुति

पशुः' (विकटं विहस्य) चरमे निःश्वसनेऽपि जननीसुतत्व भ्रान्तिः! अभिमन्युः, सुभद्रा, प्रद्युम्नः, कृष्णः (पुनरुच्चैः विकटं विहस्य) भवतु, कृतं मयेदानीं शङ्कुस्थापनं धर्मरक्षणाय। विजृम्भतामयं यज्ञो निरन्तरायम्। (इति विकटाट्टहासं कुर्वन् निष्क्रान्तः)

[यवनिका]

ERRATA

Page	Line	Read	For
२७	१५	सुष्ठु	सुप्ठु
३१	१६	शत्रुः	शत्रः
३२	२	सिंहीः	सिहीः
,,	४	युद्ध एवेति	युद्धमेवेति
,,	५	क्रूरमृगाः	क्रूमृगाः
,,	२०	स्वाङ्गे	स्वङ्गे